INTERNATIONAL JOURNAL OF VERSATILE RESEARCH AND ANALYSIS (IJVRA)
© 2026 IJVRA | Volume 4, Issue 3, March 2026 | ISSN: 2984-8903 | IJVRA.ORG

# मुण्डकोपनिषद् प्रतिपादितपरा–अपरा विद्ययोः दार्शनिकमीमांसा

**डॉ० प्रीति सिरौटीया**
**सहा० आचार्य- संस्कृत, नेहरु महाविद्यालय, ललितपुर, उत्तर प्रदेश, भारत २८४४०३**
**dr.preetisiroutiya@gmail.com**

**सारांश (Abstract)**

मुण्डकोपनिषद् वैदिकवाङ्मये ब्रह्मविद्यायाḥ प्रतिपादनस्य अत्यन्तं महत्त्वपूर्णम् उपनिषद् अस्ति। अस्मिन् परा–अपरा विद्ययोः द्विविधं भेदं प्रतिपाद्य ज्ञानस्य श्रेणीबद्धा दार्शनिकी संरचना निरूपिता अस्ति। अपरा विद्या वेद-वेदाङ्गादिलौकिकशास्त्रज्ञानरूपेण, परा तु अक्षरब्रह्मविज्ञानरूपेण प्रतिपादिता अस्ति। अस्मिन् शोधपत्रे परा–अपरा विद्ययोः संकल्पना, स्वरूपम्, प्रयोजनम्, तात्त्विकाधारः, शास्त्रीयसन्दर्भाः तथा समकालीनप्रासंगिकता इत्यादीनां विषयाणां गम्भीरं विश्लेषणं कृतम् अस्ति।

**शब्दकुञ्जी (Keywords) :** परा विद्या, अपरा विद्या, ब्रह्मविद्या, अक्षरब्रह्म, उपनिषद्, आत्मज्ञानम्

## भूमिका (Introduction)

उपनिषद्वाङ्मयं भारतीयदर्शनस्य आत्मा इव मन्यते। उपनिषत्सु ज्ञानस्य सर्वोच्चा संकल्पना ब्रह्मविद्यारूपेण प्रतिपादिता अस्ति। मुण्डकोपनिषद् विशेषतः ज्ञानस्य द्विविधं स्वरूपं—परा तथा अपरा—स्पष्टतया विभज्य निरूपयति। अस्य उपनिषदः प्रारम्भ एव ब्रह्मविद्यायाḥ परम्परां सूचयति— **"ब्रह्मा देवानां प्रथमः संबभूव विश्वस्य कर्ता भुवनस्य गोप्ता।"**[1] अनेन सूचितं भवति यत् ब्रह्मविद्या दिव्यपरम्परया प्रवहमानाऽस्ति, या गुरुपरम्परया शिष्येषु संप्रेष्यते तथा आत्मज्ञानस्य परममार्गं प्रकाशयति।

## परा–अपरा विद्ययोः मूलस्रोतः

मुण्डकोपनिषद् इत्यस्मिन् उपनिषदि परा–अपरा विद्ययोः स्वरूपं स्पष्टतया निरूपितम् अस्ति। तत्र उच्यते— **"द्वे विद्ये वेदितव्ये इति ह स्म यद् ब्रह्मविदो वदन्ति — परा चैवापरा च।"**[2] अर्थात् ब्रह्मविदः आचार्याः वदन्ति यत् ज्ञातव्ये विद्ये द्वे एव स्तः—परा तथा अपरा। अतः ज्ञानं द्विविधं परिगण्यते।

अपरा विद्यायाः स्वरूपं विवेचयन् उपनिषद् एवं वदति— **"तत्रापरा ऋग्वेदो यजुर्वेदः सामवेदोऽथर्ववेदः शिक्षाकल्पो व्याकरणं निरुक्तं छन्दो ज्योतिषमिति।"**[3] अर्थात् ऋग्वेद, यजुर्वेद, सामवेद, अथर्ववेद इत्यादि समस्तं वैदिकवाङ्मयम्, तथा शिक्षा, कल्प, व्याकरण, निरुक्त, छन्दः, ज्योतिषम् इत्येते वेदाङ्गाः अपरा विद्यायाः अन्तर्गताः गण्यन्ते। एते सर्वे लौकिक-शास्त्रीयज्ञानस्य विभागे परिगण्यन्ते। तस्य विपरीततया परा विद्या सा उच्यते, या अक्षरस्य ब्रह्मणः साक्षात्काररूपं ज्ञानं जनयति।

**अपरा विद्यायाः स्वरूपम्**

अपरा विद्या लौकिकं तथा शास्त्रीयं ज्ञानम् अस्ति। सा कर्मकाण्डेन, भाषाशास्त्रेण, व्याकरणेन, छन्दसा, ज्योतिषशास्त्रेण च सम्बद्धा भवति। एतत् ज्ञानं मानवजीवने आवश्यकम् अस्ति, किन्तु तदेव परमपुरुषार्थस्य साधनं न भवति।

एवमेव मुण्डकोपनिषद् इत्यत्र उक्तम्— **"परिक्ष्य लोकान् कर्मचितान् ब्राह्मणो निर्वेदमायात्।"**[4] अयं मन्त्रः अपरा विद्यायाः सीमां तथा परा विद्यायाः अनिवार्यतां गम्भीरतया प्रतिपादयति। अत्र "परिक्ष्य" इति पदं सूचयति यत् विवेकी साधकः (ब्राह्मणः) प्रथमं कर्मभिः प्राप्तान् लोकान्—स्वर्गादिफलरूपान्—सम्यक् परीक्षते। सः अवगच्छति यत् ते सर्वेऽपि अनित्याः तथा कर्मजन्याः सन्ति; अतः तेषां माध्यमेन नित्यस्य, अकृतस्य, अविनाशिनः ब्रह्मणः प्राप्तिः न सम्भवति— **"नास्त्यकृतः कृतनेन।"** एषा बुद्धिः तं "निर्वेद" अथवा वैराग्यभावस्य दिशि नयति, यः परा विद्यायाः प्राप्तेः पूर्वपीठिका भवति।

ततोनन्तरम् उपनिषद् आदेशं ददाति यत् ब्रह्मज्ञानलाभाय साधकः तादृशस्य गुरोः शरणं गच्छेत्, यः **"श्रोत्रियः"** (शास्त्रविद्) तथा **"ब्रह्मनिष्ठः"** (ब्रह्मानुभवसमन्वितः) भवेत्। एवं स्पष्टं भवति यत् कर्मप्रधानाऽपरा विद्या आत्मज्ञानस्य परमसाधनं न, अपितु वैराग्यजननपूर्वकं गुरु-उपदेशमार्गेण परा विद्यायाः प्राप्तेः पूर्वतैयारीरूपेण कार्यं करोति। अतः अयं मन्त्रः अपरा विद्यायाḥ परा विद्यायाः प्रति गमनस्य दार्शनिकयात्रायाः निर्णायकसूत्ररूपेण अवभासते।

**परा विद्यायाः परिभाषा**

मुण्डकोपनिषद् परा विद्यां परिभाषयन् वदति— **"यया तदक्षरमधिगम्यते।"**[5] अर्थात् या विद्या तदक्षरब्रह्मणः ज्ञानं जनयति, सा एव परा विद्या उच्यते। अत्र "अक्षर" शब्देन अविनाशी, नित्य, सर्वव्यापकं ब्रह्म निर्दिश्यते। तदेव ब्रह्मोपनिषद् अन्यत्र एवं वर्णयति—

**"यत्तदद्रेश्यमग्राह्यमगोत्रमवर्णम् ।**
**अचक्षुःश्रोत्रं तदपाणिपादम् ॥"**[6]

अस्य मन्त्रस्य माध्यमेन ब्रह्मणः निर्गुण-निराकारस्वरूपं प्रतिपादितम् अस्ति। अत्र ब्रह्म इन्द्रियातीतं, रूपरहितं, कारणरहितं च सर्वव्यापकं तत्त्वम् इति निरूप्यते।

- **"अद्रेश्यम्"** तथा **"अग्राह्यम्"** इत्येताभ्यां पदाभ्यां स्पष्टं भवति यत् ब्रह्म न इन्द्रियगोचरं, न च मनोबुद्धेः विषयः अस्ति।
- **"अगोत्रम्"** इति पदेन तस्य अनादित्वं तथा स्वतन्त्रसत्ता प्रतिपाद्यते।
- **"अचक्षुःश्रोत्रम्"** इत्यादिना सूचितं भवति यत् ब्रह्म स्वयं इन्द्रियरहितम् अपि सन् समस्तेन्द्रियाणां मूलाधाररूपेण स्थितम् अस्ति।

अतः अयं मन्त्रः परा विद्यायाः प्रतिपाद्यविषयस्य—ब्रह्मणः—स्वरूपवर्णनं करोति। स ब्रह्म न इन्द्रियैः दृष्टुं शक्यते, न स्प्रष्टुं शक्यते, न तस्य कश्चित् रूपवर्णः अस्ति; तथापि स एव समस्तजगतः मूलकारणं, नित्यं सर्वव्यापकं च सत्यं विद्यते। एषः ब्रह्म इन्द्रियातीतः, निराकारः, अव्यक्तः च अस्ति।

**ब्रह्मविद्यायाः दार्शनिकस्वरूपम्**

मुण्डकोपनिषद् इत्यस्मिन् ग्रन्थे ब्रह्मविद्यायाः दार्शनिकस्वरूपं परा विद्यायाः रूपेण प्रतिपादितम् अस्ति। सा एव अक्षरब्रह्मणः साक्षात्कारं जनयति, यस्मात् समस्तस्य जगतः उत्पत्तिः, स्थितिः तथा लयः भवति। उपनिषद् (१.१.४–५) अपरा विद्यां—वेदवेदाङ्गादिरूपां—परा विद्यया सह स्पष्टतया विभज्य वदति यत् परा विद्या सा एव— **"यया तदक्षरमधिगम्यते"**—या अविनाशिनः ब्रह्मणः ज्ञानं प्रददाति।

एतत् ब्रह्म इन्द्रियातीतं, निराकारं, निर्गुणं, सर्वव्यापकं, सूक्ष्मं च अव्ययं च अस्ति— **"यत्तदद्रेश्यमग्राह्यम..."** इति मन्त्रेण तस्य स्वरूपं निरूप्यते। अनेन सूचितं भवति यत् ब्रह्म न दृश्यं, न ग्राह्यं, तथापि स एव समस्तभूतानां मूलकारणम् अस्ति। अस्याः ब्रह्मविद्यायाः उद्देश्यः केवलं बौद्धिकसूचना न, अपितु आत्मसाक्षात्कारः एव। अतः उपनिषद् अन्यत्र वदति **"नायमात्मा प्रवचनेन लभ्यो न मेधया न बहुना श्रुतेन।**
**यमेवैष वृणुते तेन लभ्यः..."**[7] अर्थात् आत्मा न केवलं वाक्पटुतया, न मेधया, न बहुशास्त्राध्ययनेन लभ्यते; किन्तु अन्तःकरणशुद्ध्या, श्रद्धया, ध्यानसाधनया च तस्य साक्षात्कारः सम्भवति।

अत्र ब्रह्म जगतः **उपादानकारणम्** तथा **निमित्तकारणम्** उभयरूपेण प्रतिपादितम् अस्ति। यथा मकड़ी स्वदेहात् एव जालं निष्कास्य पुनः तत्रैव नयति— **"यथोर्णनाभिः सृजते गृह्णते च।"**[8] तथैव ब्रह्मणः एव जगतः अभिव्यक्तिः भवति एवं मुण्डकोपनिषदः ब्रह्मविद्या ज्ञानकर्मसंन्यासप्रधानं निर्गुणब्रह्मसाक्षात्काररूपं तत्त्वदर्शनं प्रतिपादयति, यत् अविद्यानिवृत्त्या मोक्षमार्गं प्रशस्तं करोति।

**अद्वैतदृष्ट्या ब्रह्मस्वरूपम्**

मुण्डकोपनिषद् इत्यत्र ब्रह्मणः अद्वैतस्वरूपं अत्यन्तं प्रभावकारिणा रीतीया प्रतिपादितम् अस्ति— **"ब्रह्मैवेदममृतं पुरस्ताद् ब्रह्म पश्चाद् ब्रह्म दक्षिणतश्चोत्तरं च।"**[9] अस्मिन् मन्त्रे उपनिषद् अद्वैततत्त्वस्य पराकाष्ठां दर्शयति। अत्र ब्रह्म केवलं जगतः कारणरूपेण न निरूप्यते, अपितु जगतः वास्तविकसत्तारूपेण अपि प्रतिपाद्यते। "पुरस्तात्", "पश्चात्", "दक्षिणतः", "उत्तरम्", "अधः", "ऊर्ध्वम्" इत्येतेषां दिशानां उल्लेखः प्रतीकात्मकः अस्ति। अस्य तात्पर्यम् एतत्—यत् स्थानकालवस्तुपरिच्छेदातीतं यत् सर्वव्यापकं तत्त्वं विद्यते, तदेव ब्रह्म।

एषा दार्शनिकी दृष्टिः सर्वभेदभावस्य निरसनं करोति। सा बोधयति यत् जीव-जगत्-ईश्वरयोः मध्ये या भिन्नता प्रतीयते, सा केवलम् अविद्याजनिता। तत्त्वतः सर्वम् अपि ब्रह्मस्वरूपमेव अस्ति। अस्यैव अनुभूतिः ब्रह्मविद्यायाः चरमफलम् उच्यते—यत्र ज्ञाता, ज्ञानं, ज्ञेयम् इति त्रिपुटीभेदः पूर्णतया लीयते। अतः परा विद्या आत्मसाक्षात्कारस्य प्रक्रिया इति परिगण्यते।

**गुरु–शिष्यपरम्परा**

मुण्डकोपनिषद् इत्यत्र ब्रह्मविद्यायाः साधनपद्धतिः अपि स्पष्टतया निरूपिता अस्ति—**"तद्विज्ञानार्थं स गुरुमेवाभिगच्छेत् समित्पाणिः श्रोत्रियं ब्रह्मनिष्ठम्।"**[10] अस्मिन् मन्त्रे ब्रह्मज्ञानस्य प्राप्त्यर्थं गुरोः आश्रयस्य अनिवार्यता प्रतिपादिता अस्ति। अत्र स्पष्टं सूचितं यत् ब्रह्मतत्त्वस्य ज्ञानं केवलं तर्केण, पठनमात्रेण वा

बौद्धिकप्रयत्नेन न लभ्यते; अपि तु सम्प्रदायपरम्परायां स्थितस्य गुरोः सन्निधौ एव तस्य यथार्थबोधः सम्भवति।

- **गुरुमेव** — अत्र "एव" इति पदं अनिवार्यतां सूचयति; अर्थात् गुरुविना ब्रह्मतत्त्वस्य सम्यग्ज्ञानं न सम्भवति।
- **समित्पाणिः** — बाह्यतः समिधा धृत्वा गुरुकुलं प्रति गमनं प्राचीनपरम्परायाः प्रतीकः अस्ति; आन्तरिकतया तु एतत् अहंकारत्यागस्य, सेवाभावस्य तथा आत्मसमर्पणस्य सूचकं भवति।
- **श्रोत्रियः** — गुरु केवलं अनुभवी साधुः न भवेत्; सः वेदवेदान्तपरम्परायाः तत्त्वज्ञः अपि भवेत्।
- **ब्रह्मनिष्ठः** — केवलं शास्त्रज्ञानं पर्याप्तं न; अपि तु सः आत्मानुभूतौ स्थितः भवेत्।

एवं स्पष्टं भवति यत् ब्रह्मविद्यायाः प्राप्त्यर्थं **शास्त्र–गुरु–शिष्य** इति त्रिपुटी अनिवार्या अस्ति। शास्त्रं प्रमाणरूपेण कार्यं करोति, गुरु तस्य जीवितव्याख्याता भवति, श्रद्धावान् शिष्यः तस्य अधिकारी। संक्षेपेण उक्ते—ब्रह्मज्ञानस्य मार्गः आत्मानुशासनम्, श्रद्धा, विनयः तथा सद्गुरोः परम्परानुगमनम् इत्येभिः साधनैः एव प्रशस्तः भवति।

**कर्म–ज्ञानयोः सम्बन्धः**

मुण्डकोपनिषद् इत्यत्र कर्म तथा ज्ञानयोः सम्बन्धः सूक्ष्मतया निरूपितः अस्ति। उपनिषद् वदति— **"प्लवा ह्येते अदृढा यज्ञरूपाः।"**[11] अस्य मन्त्रस्य भावार्थः अयम्—यज्ञादयः कर्माणि, येषां विषये जनाः परमकल्याणस्य साधनत्वं मन्यन्ते, ते वास्तवतः *प्लवाः* (नावः) इव सन्ति, किन्तु *अदृढाः*—अस्थिराः तथा दुर्बलाः। उपनिषद् अत्र कर्मकाण्डस्य सीमां दर्शयति। तानि कर्माणि स्वर्गादिलौकिक-अलौकिकफलप्राप्तिं कर्तुं समर्थानि भवन्ति, किन्तु नित्यस्य अविनाशिनः ब्रह्मणः प्राप्तिं न साधयन्ति।

यथा दुर्बला नौका महासागरं न तरितुं शक्नोति, तथैव केवलं यज्ञादिकर्मभिः जन्ममरणरूपस्य संसारसागरस्य अतिक्रमणं न सम्भवति। अतः अयं मन्त्रः परा विद्यायाः अनिवार्यतां प्रतिपादयति तथा सूचयति यत् मोक्षप्राप्तये कर्म न, अपितु ब्रह्मज्ञानमेव दृढं तथा परमं साधनम् अस्ति।

**आत्मज्ञानस्य प्रक्रिया**

मुण्डकोपनिषद् इत्यत्र आत्मज्ञानस्य साधनप्रक्रिया अपि निरूपिता अस्ति— **"नायमात्मा प्रवचनेन लभ्यो न मेधया न बहुना श्रुतेन।"**[12] अस्य मन्त्रस्य तात्पर्यम्—आत्मतत्त्वस्य साक्षात्कारः न वाक्पटु-प्रवचनेन, न केवलया मेधया (बौद्धिकप्रखरतया), न च बहुशास्त्रश्रवणेन लभ्यते। अत्र उपनिषद् स्पष्टतया प्रतिपादयति यत् आत्मज्ञानं केवलं बौद्धिकसिद्धिः न, अपि तु अस्तित्वगत-अनुभूतिरेव।

शास्त्राणि तथा तर्कः मार्गदर्शकत्वेन अवश्यं सहायकौ स्तः, किन्तु निर्णायकं तत्त्वं भवति—अन्तःकरणशुद्धिः, श्रद्धा, अनन्याभिलाषा तथा आत्मसमर्पणभावः। अत एव उपनिषद् अग्रे वदति— **"यमेवैष वृणुते तेन लभ्यः।"** अर्थात् यं साधकं आत्मा स्वयमेव अनुगृह्णाति, स एव तस्य साक्षात्कारं प्राप्नोति। अत्र तात्पर्यम् एतत्—यदा साधकः अहंकारं, दम्भं, पाण्डित्याभिमानं च त्यक्त्वा संयमेन, साधनया तथा गुरूपदेशानुसारं जीवनं यापयति, तदा एव आत्मतत्त्वस्य प्रकाशः तस्य अन्तःकरणे प्रकटते। एवं अयं मन्त्रः बौद्धिकज्ञानस्य अनुभवज्ञानरूपे परिणमनस्य अनिवार्यतां प्रतिपादयति।

**आत्मानुभूतिः**

मुण्डकोपनिषद् इत्यत्र आत्मसाक्षात्कारस्य फलमपि वर्णितम् अस्ति— **"भिद्यते हृदयग्रन्थिः छिद्यन्ते सर्वसंशयाः।"**[13] अर्थात् यदा साधकः परावरब्रह्मणः—कारणकार्याधिष्ठानस्य—साक्षात्कारं करोति, तदा तस्य हृदयस्थिताः *ग्रन्थयः*—अविद्या, अहंकारः, देहाभिमानः च—भिद्यन्ते। तेन सह सर्वे दार्शनिकाः आध्यात्मिकाश्च संशयाः नश्यन्ति, तथा संचितकर्मबन्धनं क्षीयते।

अत्र "हृदयग्रन्थिः" इति पदं अज्ञानजन्यस्य आसक्तेः, कर्तृत्व-भोक्तृत्वाभिमानस्य च प्रतीकं मन्यते। ब्रह्मसाक्षात्कारात् एषः मूलाज्ञाननाशः भवति, यस्मात् ज्ञान–ज्ञाता–ज्ञेयभेदः लीयते तथा आत्मैक्यस्य अनुभूतिरेव अवशिष्यते। एषा एव उपनिषदां मतानुसारं **मोक्षावस्था** उच्यते। अतः स्पष्टं भवति—यदा ब्रह्मज्ञानं भवति, तदा अज्ञानग्रन्थिः पूर्णतया विनश्यति।

**परा–अपरा विद्ययोः तुलनात्मकविवेचनम्**

| अपरा विद्या | परा विद्या |
| --- | --- |
| शास्त्रीयज्ञानम् | आत्मज्ञानम् |
| कर्मप्रधानम् | ज्ञानप्रधानम् |
| सीमितफलप्रदा | मोक्षप्रदा |
| बहिर्मुखी | अन्तर्मुखी |

मुण्डकोपनिषद् इत्यत्र परा–अपरा विद्ययोः स्पष्टं विभाजनं कृतम् अस्ति। अपरा विद्यायाः अन्तर्गताः ऋग्वेदः, यजुर्वेदः, सामवेदः, अथर्ववेदः तथा शिक्षा, कल्पः, व्याकरणम्, निरुक्तम्, छन्दः, ज्योतिषम् इत्यादयः वेदाङ्गाः परिगण्यन्ते। एते सर्वे शास्त्रीयं, भाषाशास्त्रीयं, अनुष्ठानात्मकं च ज्ञानं सूचयन्ति, यत् धर्मकर्मणां, यज्ञानां तथा लौकिक-अलौकिकफलप्राप्तेः साधनरूपेण उपयुज्यते।

तस्य विपरीततया परा विद्या सा उच्यते— **"यया तदक्षरमधिगम्यते"**[14]—या अविनाशिनः ब्रह्मणः साक्षात्कारं जनयति। अपरा विद्या ज्ञानस्य साधनात्मकं तथा परोक्षं रूपम् अस्ति; सा मनोबुद्धिस्तरे कार्यं करोति तथा कर्मफलपर्यन्ता भवति। परा विद्या तु आत्मानुभूतिरूपा प्रत्यक्षविद्या अस्ति, या अविद्यानाशिनी सती मोक्षस्य कारणं भवति।

अतः स्पष्टं यत् अपरा विद्या *साधनचरणम्*, परा विद्या तु *साध्यचरणम्* इति कथ्यते। अपरा विद्या बहिर्मुखी, शास्त्रप्रधानाऽस्ति तथा कर्मसम्बद्धा; परा विद्या तु अन्तर्मुखी, आत्मकेन्द्रिता तथा ज्ञानप्रधानाऽस्ति। तयोः मध्ये विरोधः न, किन्तु क्रमबद्धस्य आध्यात्मिकोन्नयनस्य सम्बन्धः एव विद्यते।

### अन्येषु उपनिषत्सु समानविचाराः

मुण्डकोपनिषद् इत्यत्र प्रतिपादितं परा–अपरा विद्ययोः द्विभाजनं अन्येषु उपनिषत्सु अपि भिन्नशब्दैः प्रतिध्वनितं दृश्यते।

ईशावास्योपनिषद्[15] (९–११) इत्यत्र "विद्या" तथा "अविद्या" इत्येतयोः समुच्चयः प्रतिपाद्य उच्यते यत् अविद्यया (कर्मणा) मृत्युं तीर्त्वा विद्यया (ब्रह्मज्ञानेन) अमृतत्वं प्राप्यते। अयं विचारः अपरा (कर्मप्रधान) तथा परा (ज्ञानप्रधान) विद्ययोः समन्वितं स्वरूपं सूचयति।

कठोपनिषद् इत्यत्र "श्रेयः" तथा "प्रेयः" इति द्विविधमार्गयोः भेदः दर्शितः अस्ति। तत्र श्रेयः आत्मविद्यायाः मार्गः अस्ति, यः परा विद्याया तुल्यः मन्यते; प्रेयः तु इन्द्रियसुखानां तथा कर्मफलानां मार्गः अस्ति, यः अपरा विद्याया समतुल्यः।

छान्दोग्योपनिषद् अपि **"एकविज्ञानेन सर्वविज्ञानम्"**[16] इति प्रतिज्ञां प्रतिपादयति— **"येन अश्रुतं श्रुतं भवति, अमतं मतं, अविज्ञातं विज्ञातम्।"**[17] अस्य तात्पर्यम्—परम तत्त्वस्य ज्ञानात् सर्वस्य ज्ञानं सम्भवति। एषा परा विद्यायाḥ सर्वोच्चता सूचयति। तद्वत् बृहदारण्यकोपनिषद् अपि वदति— **"आत्मा वा अरे द्रष्टव्यः श्रोतव्यो मन्तव्यो निदिध्यासितव्यः।"**[18] अनेन आत्मविद्या एव मानवजीवनस्य परमलक्ष्यमिति प्रतिपाद्यते। एवं स्पष्टं भवति यत् विभिन्नेषु उपनिषत्सु कर्मप्रधानं लौकिकं वा शास्त्रीयज्ञानं सीमितरूपेण (अपरा) स्वीकृतम्, आत्मब्रह्मसाक्षात्काररूपा विद्या तु परमलक्ष्यरूपेण (परा) प्रतिष्ठिता अस्ति। एषा दार्शनिकी परम्परा भारतीयवेदान्तदर्शने व्यापकतया स्वीकृता दृश्यते।

### वेदान्ते परा विद्या

ब्रह्मसूत्र इत्यस्य आद्यसूत्रम्— **"अथातो ब्रह्मजिज्ञासा।"**[19] एतत् सूत्रं वेदान्तदर्शनस्य उद्घोषरूपेण प्रसिद्धम् अस्ति। अत्र "अथ" इति पदं साधकस्य आध्यात्मिकपरिपक्वतां सूचयति। यदा साधकः विवेक-वैराग्य-शमादिषट्कसम्पत्त्या मुमुक्षुत्वेन च सम्पन्नो भवति, तदा "अतः"—अर्थात् संसारस्य अनित्यत्वं सम्यगनुभूय—तस्य ब्रह्मणः विषये जिज्ञासा प्रवर्तते।

अत्र "जिज्ञासा" शब्दः केवलां बौद्धिकजिज्ञासां न बोधयति, किन्तु परमसत्यस्य साक्षात्काराय गम्भीरतत्त्वचिन्तनरूपां साधनाम् अपि सूचयति। अतः एतत् सूत्रं सम्पूर्णस्य वेदान्तशास्त्रस्य मूलाधाररूपेण प्रतिष्ठितम्। आदि शंकराचार्य अपि स्वभाष्येषु प्रतिपादयति यत् ब्रह्मज्ञानमेव मानवजीवनस्य परमपुरुषार्थः अस्ति, तथा एषा ब्रह्मविद्यैव परा विद्या इति कथ्यते।

### समकालीनप्रासंगिकता

मुण्डकोपनिषद् इत्यत्र प्रतिपादिता परा–अपरा विद्ययोः अवधारणा अद्यतनबौद्धिक-सामाजिकसन्दर्भे अपि अत्यन्तं प्रासंगिका दृश्यते। अपरा विद्यायाः अन्तर्गताः सर्वाः ज्ञानप्रणाल्यः गण्यन्ते, याः भाषा, विज्ञान, प्रौद्योगिकी, अर्थशास्त्र, प्रबन्धनशास्त्र, चिकित्साशास्त्रादिरूपेण लौकिकजीवनस्य उन्नतौ सहायकाः भवन्ति। आधुनिकशिक्षापद्धतिः मुख्यतया अस्याः अपरा विद्यायाः एव केन्द्रे प्रतिष्ठिता दृश्यते। एषा विद्या मानवजीवने

सुविधा, संगठनम् तथा कार्यकुशलतां जनयति; तथापि सा अस्तित्वसम्बद्धान् प्रश्नान्—*"कोऽहम्?"*, *"जीवनस्य परमलक्ष्यं किम्?"*—इत्यादीन् समाधानयितुं न शक्नोति।

अत्रैव परा विद्यायाः आवश्यकता प्रकटते। परा विद्या आत्मबोधं, नैतिकचेतनां, आध्यात्मिकसंवेदनशीलतां तथा आन्तरिकसमत्वं जनयति। अद्यतनयुगे, यदा प्रौद्योगिक्याः तीव्रविकासेन सह मानसिकतनावः, अस्तित्वगतशून्यता तथा मूल्यमूलकसंकटानि वर्धन्ते, तदा परा विद्या मानवजीवनाय दिशा, अर्थं करुणां च प्रददाति।

समकालीनशिक्षादर्शने "समग्रशिक्षा" (Holistic Education), "सचेतनता" (Mindfulness) तथा "नीतिशिक्षा" (Ethics) इत्यादयः याः प्रवृत्तयः दृश्यन्ते, ताः वस्तुतः परा विद्याया एव पुनर्स्मरणरूपाः मन्यन्ते।

अतः अद्यतनयुगे अपरा विद्या बाह्यविकासस्य साधनम् अस्ति, परा विद्या तु आन्तरिकोत्कर्षस्य आधारः। तयोः सम्यक् समन्वय एव समग्रस्य मानवीयस्य च सततविकासस्य मूलकुञ्जिका इति स्पष्टं भवति।

## निष्कर्ष

मुण्डकोपनिषद् इत्यत्र प्रतिपादितं परा–अपरा विद्ययोः विभाजनं ज्ञानस्य श्रेणीबद्धां संरचनां स्पष्टतया प्रकाशयति। अपरा विद्या मानवजीवने आवश्यकं साधनरूपं ज्ञानम् अस्ति; किन्तु परमलक्ष्यं परा विद्या एव, या अक्षरब्रह्मणः साक्षात्कारं जनयति।

उपनिषद् अपि वदति— **"स यो ह वै तत्परं ब्रह्म वेद ब्रह्मैव भवति।"**[20] अस्य मन्त्रस्य तात्पर्यम् एतत्—यः साधकः तत् परमं ब्रह्म तत्त्वतः वेत्ति, सः स्वयमेव ब्रह्मस्वरूपतां प्राप्नोति। अत्र "ब्रह्मैव भवति" इत्यस्य अर्थः न कश्चित् नूतनः परिवर्तनः, किन्तु अविद्यानिवृत्त्या स्वस्य नित्यस्य ब्रह्मस्वभावस्य अनावरणम्।

तदा तस्य सीमिता जीवभावना निवर्तते, सः स्वस्य अद्वैतस्वरूपं सम्यगवगच्छति। एतादृशः ज्ञानी शोकपापादिभ्यः परं भवति, यतः तस्य हृदयस्थाः अज्ञानग्रन्थयः—अविद्या, कामः, कर्म च—विनश्यन्ति। एवं मुण्डकोपनिषदः प्रतिपादयति यत् ब्रह्मज्ञानमेव मोक्षस्य परमं साधनम्। ज्ञानप्राप्तौ ज्ञाता तथा ब्रह्मणोः मध्ये कश्चन वास्तविकभेदः न अवशिष्यते; अद्वैतस्वरूपस्य अनुभूतिः एव तस्य चरमफलम् इति वेदान्तदर्शनस्य अन्तिमनिष्कर्षः प्रतिपाद्यते।

## संदर्भ-ग्रन्थ-सूची

1. मुण्डकोपनिषद् — शाङ्करभाष्यसहितम्, गीताप्रेस, गोरखपुर।
2. ईशावास्योपनिषद् — शाङ्करभाष्यसहितम्, गीताप्रेस, गोरखपुर।
3. कठोपनिषद् — शाङ्करभाष्यसहितम्, गीताप्रेस, गोरखपुर।
4. छान्दोग्योपनिषद् — शाङ्करभाष्यसहितम्, गीताप्रेस, गोरखपुर।
5. बृहदारण्यकोपनिषद् — शाङ्करभाष्यसहितम्, गीताप्रेस, गोरखपुर।

6. ब्रह्मसूत्र — आदि शंकराचार्य भाष्यसहितम्, गीताप्रेस, गोरखपुर।
7. भगवद्गीता — शाङ्करभाष्यसहितम्, गीताप्रेस, गोरखपुर।
8. उपनिषद्-संग्रह — गीताप्रेस, गोरखपुर।
9. सर्वपल्ली राधाकृष्णन — *Indian Philosophy*, लन्दन।
10. सुरेन्द्रनाथ दासगुप्त — *A History of Indian Philosophy*, कैम्ब्रिज।

[1] मुंडकोपनिषद 1.1.1
[2] मुंडकोपनिषद 1.1.4
[3] मुंडकोपनिषद 1.1.5
[4] मुंडकोपनिषद 1.2.12
[5] मुंडकोपनिषद 1.1.5
[6] मुंडकोपनिषद 1.1.6
[7] मुंडकोपनिषद 3.2.3
[8] मुंडकोपनिषद 1.1.7
[9] मुंडकोपनिषद 2.2.11
[10] मुंडकोपनिषद 1.2.12
[11] मुंडकोपनिषद 1.2.7
[12] मुंडकोपनिषद 3.2.3
[13] मुंडकोपनिषद 2.2.8
[14] मुण्डकोपनिषद् 1.1.5
[15] ईशावास्योपनिषद् 9-11
[16] छान्दोग्योपनिषद् **6.1.3.** (उद्दालक–श्वेतकेतु संवाद(
[17] छान्दोग्योपनिषद् 6.1.3. (उद्दालक–श्वेतकेतु संवाद)
[18] बृहदारण्यकोपनिषद् 2.4.5 (याज्ञवल्क्य–मैत्रेयी संवाद)
[19] बादरायण (वेदव्यास) ब्रह्मसूत्र 1.1.1
[20] मुंडकोपनिषद 3.2.9

**Copyright & License:**

© Authors retain the copyright of this article. This work is published under the Creative Commons Attribution 4.0 International License (CC BY 4.0), permitting unrestricted use, distribution, and reproduction in any medium, provided the original work is properly cited.